# श्री दिवाकर पंचकं

## श्री दिवाकर पंचकं

अतुल्यवीर्यमुग्रतेजसं सुरं
सुकांतिमिंद्रियप्रदं सुकांतिदं |
कृपारसैकपूर्णमादिरूपिणं
दिवाकरं सदा भजे सुभास्वरं || 1 ||

इनं महीपतिं च नित्यसंस्तुतं
कलासुवर्णभूषणं रथस्थितं |
अचिंत्यमात्मरूपिणं ग्रहाश्रयं
दिवाकरं सदा भजे सुभास्वरं || 2 ||

उषोदयं वसुप्रदं सुवर्चसं
विदिक्प्रकाशकं कविं कृपाकरं |
सुशांतमूर्तिमूर्ध्वगं जगज्ज्वलं
दिवाकरं सदा भजे सुभास्वरं || 3 ||

ऋषिप्रपूजितं वरं वियच्चरं
परं प्रभुं सरोरुहस्य वल्लभं |
समस्तभूमिपं च तारकापतिं
दिवाकरं सदा भजे सुभास्वरं || 4 ||

ग्रहाधिपं गुणान्वितं च निर्जरं
सुखप्रदं शुभाशयं भयापहं |
हिरण्यगर्भमुत्तमं च भास्करं
दिवाकरं सदा भजे सुभास्वरं || 5 ||

इति श्री दिवाकर पंचकं |